শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীরঙ্গরামানুজমহাদেশিকৈঃ (শ্রীমুষ্ণং আণ্ডৱন্) অনুগৃহীতং

# ॥ শ্রী পঞ্চানন পঞ্চামৃতম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী পঞ্চানন পঞ্চামৃতম্ ॥

ৱিহঙ্গমেন্দ্রৱাহকং ৱিভূতিযুগ্মনাযকং
ভুজঙ্গতল্পশাযিনং দযামযং চ মাযিনম্।
ৱিশিষ্টৱেষপোষকং ৱিনম্রপাপমাপকং
প্রদোষকালসংভৱং নমাম মাধৱং হরিম্॥ 1 ॥

উমাধৱাদিদৈৱতৈর্যুগাদিসৃষ্টভূমিকৈঃ
সদার্চিতাঙ্ঘ্রিপদ্মকং সপদ্মকন্ধরান্ৱিতম্।
নিরস্তসর্ৱহেযকং সমস্ত সদ্গুণাকরং
প্রদোষকালসংভৱং নমাম মাধৱং হরিম্॥ 2 ॥

সুৱর্ণনেত্রসূদকং সুপর্ণগর্ৱপোথকং
জ্ৱলৎসটাৱিতানিত প্রদীপ্তনেত্র ভাসুরম্।
ৱিচিত্রশক্তিমেদুরং ৱিমানমেযরূপকং
প্রদোষকালসংভৱং নমাম মাধৱং হরিম্॥ 3 ॥

সুযন্ত্রবদ্ধমন্দিরং সুমন্তৃসিন্ধুনন্দকং
সুদর্শনং সুদর্শকং সুষেণহেতিধারিণম্।
সহস্রনেমিমধ্যগং সদা হি সেন্দিরং হিতং
প্রদোষকালসংভৱং নমাম মাধৱং হরিম্॥ 4 ॥

সলক্ষ্মিলক্ষ্মৱক্ষসং সুবালৱাক্যপালকং
সদর্থতন্ত্রদেশিকং কুতন্ত্রযন্ত্র নাশকম্।

কিরীটহারভূষিতং কৃপীটযোনিসেৱিতং
প্রদোষকালসংভৱং নমাম মাধৱং হরিম্॥ **5**॥

অৱগ্রহাদিশান্ত্যর্থা ৱরাহকৱিনা কৃতা।
পঞ্চশ্লোকী সদা দদ্যাৎ পঞ্চাননকৃপাং পরাম্॥ **6**॥

॥ ইতি শ্রী পঞ্চানন পঞ্চামৃতং সমাপ্তম্॥